द्धे अष्टिकान्या शाखि सूतका सूतिका पुत्रका पुत्रिका वृन्दारिका वृन्दारका आर्यका आ

रेण दक्षिणेन दक्षिणा दक्षिणातः उत्तरतः आहि च दूरे दक्षिणस्यां दिशि दूरं द
क्षिणाहि किमः सामान्ये चिदादिः कश्चित् कश्चिन् न कश्चन तदधीनकार्त्स्न्ये चेद्वी
सात राजाधीनं राजसात् सर्वं भस्म भस्मसात् उरी उररी विस्तारांगीकारयोः स
यस्मादिः कालेनिपात्यते समानेऽहनि सद्यः अद्य अधुना इदानीं तस्मिन् काले त
दा यस्मिन् यदा कदा सर्वदा एकदा अन्यदा सपदि सांप्रतम् संप्रति अद्यतिते:
ऽस्मन्नाणुणी घ्रम् पूर्वस्मिन्निति पूर्वेद्युः परेद्युः अपरेद्युः
अन्येद्युः अन्यतरेद्युः उभयेद्युः उभयद्युः तर्हि एतर्हि कर्हि यर्हि प्रादिरुपसर्गः प्र
परा अप सम् अनु अव निस् निर् दुस् दुर् अभि वि अधि सु उत् नि प्रति अति परि
अपि उप आङ् उत् अन्तर् आविर् प्रागधातोः उपसर्गा धातोः प्राक् प्रयोक्तव्याः त
दव्ययं चादिरव्ययसंज्ञं भवति अव्ययाद्विभक्तेर्लुक् सदृशं त्रिषु लिंगेषु सर्वासु
च विभक्तिषु वचनेषु च सर्वेषु यन्न व्येति तदव्ययं क्त्वाद्यन्तं च क्त्वा ल्यप् तुमुन् णम्

२१ स्यपात्रिचतुर्भ्यां एण्व त्रिहायणी चतुर्हायणी त्रिचतुर्भ्यां किं द्विहायनी बाला वयोवाचि
नः किं चतुर्हायना शाला ईन्द्रादेरानीप् अदंतात् स्त्रियां पुंयोगे इंद्राणी वरुणानी
भवानी शर्वाणी रुद्राणी मृडानी आचार्यादणत्वे आचार्यानी हिमारण्ययोर्महत्वे।
महद्धिमं हिमानी अरण्यानी यवाद्दोषे दुष्टो यवो यवानी यवनाल्लिप्यां यवनानी
मातुलोपाध्याययोर्वा मातुलानी मातुली उपाध्यायानी उपाध्याया अर्यक्षत्रियो
पाध्यायेभ्यो वा स्वार्थे अर्याणी अर्या क्षत्रियाणी क्षत्रिया उपाध्यायानी उपाध्या।
या पुंयोगे च अदंतात्स्त्रियामीप् अदृष्टिगणकी पालकांतान्न गोपालिकाश्व
पालिका सूर्याद्देवतायामाप् सूर्यस्य स्त्री देवता सूर्या अन्यासूरी जातेरयोपधा
त् जातिवाचिनोऽयकारोपधाददकारांतात् स्त्रियामीप् महिषी हंसी अयोपधा
23 त् किं क्षत्रिया वैश्या क्वचिन्न बलाका गवयहयमुकयमनुष्यमत्स्यानामनिषे
धः गवयी हयी मुकयी हलस्तद्धितस्येपि लोपः मानुषी ईपि मत्स्यस्य यलोपः
मत्सी सूर्यागस्त्ययोरीपि च सूरी अगस्ती तिष्यपुष्ययोर्नक्षत्राणि यःलोपः

पिका चटकिका चटका कानिर्भस्त्रिका निर्भस्त्रका राषिका राषका सूतिका सूतका काशि
का द्विके द्वके निस्त्रिका निस्त्रका ॥ सो वा काचि पर तरादो च पूर्वस्य ह्रस्वे वा गंगा का गंगका
गंगिका नदिका नदका प्रत्ययसीतरा प्रत्ययसितरा वा गौरादेर्वैसंघ्यभावे नगौकाने
का ...ई प्रकृते नीमघो नी मुनी कत्री यस्यलोपः ३ वर्णा वर्णी पाले पे भवति तद्धिते म
र यकार ई पिर ३ उपगवी ... ई प्यनोऽल्लोपः राज्ञी द्विदामी ... तः षकार टकार ३ कार सकार
न्तेभ्यो धातः स्त्रियामीप् प्रत्ययो भवति व वराकी टकुरचर ३ गोमती विदुषी पचन्ती दीव्य
न्ती तुदती तुदन्ती म ... ताने प सीमा सीमानौ अनन्ताद्द्रु ... वहुयज्वा वहुराजानौ ३ प
वादाम दमे वहुयज्वा वहुयज्वे ३ पधालोपिनो वहु ... वहुराज्ञी वहुराजा पक्षे ३ प्रत्यय
र भवः वहुराजा वहुराजानौ नदादेः स्त्रियामीप् नदी गौरी ... दसी उरद घ्नी
उरमात्र ... तरी चेत्स्त्रैणी ... शार्ङ्गी की गार्गी गार्ग्यायणी लोहित्यायनी का
त्यायनी कौरव्या यण माण्डुक्यायनी आसुरायणी इत्यादि अनन्त्यवयो वाचिनोऽदन्तात
स्त्रियामीप् कुमारी किशोरी वधूटी चिरिंटी तरुणी तलुनी ... ताकि ... अन्त्ये तिकिं
वृद्धौ ३ घोतस्य वहुव्रीहेर्नेदं ३ ई प स्त्रियां कुंडोध्नी घटोध्नी ... वयवाचिनो ...

३ रात कल्याणक्रोडा सुजघना सहनञ्विद्यमानपूर्वान्न सकेशा अकेशा विद्यमाननासिका नख
मुखात्संज्ञायां शूर्पणखा गौरमुखा संज्ञायां किं ताम्रमुखी कन्या वोर्गुणात् उदंताद्गुणवा
चिनो वा स्त्रियामीप् पट्वी पटुः वह्वी वहुः खरुसंयोगोपधान्न खरुः पांडुः खद्वी मृदुः कृदि
कारादक्तिर्यतो वा रात्रिः रात्री शकटिः शकटी अक्तियर्थात्किं भूतिः अजननिः पद्धत्यादिभ्यो वा पद्धती
पद्धतिः ऐच मनोर् मनुः पूतक्रतुवृषाकप्यग्निकुसितकुसिदानामैरादेश ईप् च स्त्रियां पूयो
पूतक्रतायी अग्नायी वृषाकपायी कुसितायी कुसिदायी मनोरौ वा मनायी मनावी मनुः प
त्न्यादयो निपात्याः पत्नी सपत्नी राकपत्नी वीरपत्नी सखी अशिश्वी अन्तर्वत्नी अनडुही प्राची
प्राची प्रतीची प्रत्यची कांचिद्दा दृढपतिः दृढपत्नी वृषलपतिः वृषलपत्नी रा तरुणी हरिता
हरिणी रोहिता रोहिणी श्येता श्येनी असिता असिक्नी पलिता पलिक्नी इत्यादि रतो मनुष्याज
२५ तेरीप् दाक्षी अवंती कुंती मनुष्यात्किं तित्तिरिः उत ऊः उदंतादयोपधात् स्त्रियामूप्रत्ययो
भवति कुरूः अयोपधात्किं अध्वर्युः स्त्रीपंगोः श्वश्रूः पंगूः श्वशुरस्योकाराकारलोप ऊ श्वश्रू स्त्रियां
योगे श्वश्रूः उपमानवाचि पूर्वपदादूरूत्तरपदादूः करभोरूः संहितसफलक्षणवामसहितस

मनुष्यजातिवाचिनः

तेषी पोषी जानपदी वृत्तिश्चेदन्या जानपदा कुंडी अमत्रं कुंडान्या गोणी आवपनं गो
णान्या स्थली अकृत्रिमा चेत् स्थलान्या भाजी श्राणा चेत् भाजान्या नागी स्थूला चेत् नागा
न्या काली वर्णश्चेत् कालान्या नीली औषधी प्राणिनो ऽसंज्ञायां वा नीली नीला कुशी अ
यो विकारे कामुकी मैथुनेच्छायां कामुकान्या कबरी केशविन्यासश्चेत् कबरान्या शोणाद्वा शोणी शो
णा बह्वीहर्तीति पूर्वपदात्क्तांतात् ऊरुभिन्नी जाता तान्नदंतजाता असांगपूर्वपदाद्वासु
रापीती सुरापीता पाणिगृहीती भार्यायां अन्या पाणिगृहीता क्रीतात्करणादेः वस्त्रेण
क्रीता वस्त्रक्रीती क्तादल्पते अभ्रलिप्ती द्यौः स्वांगाद्वा स्वांगवाचिनो दंताद संयोगोपधा
दुपसर्जनाद्वा स्त्रियामीप् सुमुखी सुमुखा सुकेशी सुकेशा नासिकोदरोष्ठजंघादंतकर्णशृंगा
तराभ्यो वा ईप् तुंगनासिकी तुंगनासिका मंदोदरी मंदोदरा बिंबोष्ठी बिंबोष्ठा सुजंघी सुजंघा
सुदंती सुदंता सुकर्णी सुकर्णा सुशृंगी सुशृंगा अंगगात्रकंठपुच्छात् वा ईप् स्वंगी स्वंगा सुगात्री सु
गात्रा सुकंठी सुकंठा सुपुच्छी सुपुच्छा स्वंगेत्यादि कबरमणिविषशरेभ्यः परात्पुच्छान्नित्यं कबर
पुच्छी मणिपुच्छी विषपुच्छी शरपुच्छी उपमानात्पक्षपुच्छाभ्यां श्येनपक्षी श्येनपुच्छी नक्रोडादिबहुस

२४ पाय माप्नोति तत्रापि चतुर्थी पत्यणे ते राज्ञे करं ददाति विश्लेषो भागसाम्यावधौ
पंचमी हिमवतो वतरति गंगा धावतोऽश्वात् पतति संबंधे षष्ठी राज्ञः पुरुषः
आधारे सप्तमी औपश्लेषिकः सामीपिकः अभिव्यापकः वैषयिकः नैमि
त्तिकः औपचारिकश्चेति षोढा सः कटे शेते कुमारोऽसौ वटे गावः सुशेरते तिले
षु विद्यते तैलं हृदि ब्रह्मास्मृतं परं युद्धे संनह्यते धीरोऽङ्गुल्यग्रे करिणां शतम् कि
यालक्षणं भावस्तत्रापि सप्तमी वर्षति देवे चौर आयातः गोषु दुह्यमानासु गतः
विनासहनमस्कृते निर्द्धारणे स्वाम्यादिभिश्च परातेरपि योगे द्वितीयाया या विभक्तयः
25 विनादियोगे द्वितीया विना पापं सर्वं पालति अंतरे रात्रिं किं जीवितेन अंतरा
त्वां मां हरिः जपमनु प्रावर्षत उपहरिं सुराः कृष्णं परि अनु वा हरिं मभि नदी नदी
मनु वसिता सेना अति देवान्कृष्णः अभितो ग्रामं सर्वतो नगरं धिग्जाल्ममुप

ग्रति

देः रनोपमेयपसहितो रः श फोरः लवारणो रः वामोरः सहितोरः सहोरः ननर योरीप वृद्धि
श्च नारी पत्नसिः युवन्शब्दात स्त्रियां तिः युवतिः इति स्त्रीप्रत्ययाः लिंगार्थे प्रथमा नाम
र्थमात्रे लिंगाधिक्ये च प्रथमाविभक्तिः नियतोपस्थितिको नामार्थः उच्चैः नीचैः कृष्णः श्रीः।
ज्ञानं मखारी ब्राह्मणः आढकम् अलिंगा नियतलिंगाश्च नामार्थमात्रे इत्यस्योदाहरणं अनि
यतलिंगास्तु लिंगमात्राधिक्ये इत्यस्योदाहरणं तटः तटी तटम् एकः द्वौ बहवः आमंत्रणे च प्रथमा
अभिमुखीकरणे प्रथमा हे देव हे देवौ हे देवाः भोसः भोस् भगोस् अघोस् भवत् भगवत् अ
घवत् वा निपात्या भोः भो हरे भगो नमस्ते अघो याहि एषाः कार्यकर्तृसाधनयोर्दान
पात्रे वित्रिच्छावधोसंबंधे आधारभावयोर्द्वितीयाद्याविभक्तयस्तु भवंति का
र्यं कर्मकारके द्वितीया कटं करोति कारकः को रूपं पश्यति चाहबः राज्यं प्राप्नोति धार्मिकः
सोमं सुनोति सोमपाः कर्तरि करणे च तृतीया भिन्नः शरेण रामेण रावणो लोकरावणः
कराग्रेण विदारितोपि वानरैः युध्यते प्रतः दानपात्रे चतुर्थी वेदविदे गां ददाति विप

णाखे परस्येन्द्रस्यनवृद्धिः सौमेन्द्रः परस्य किं ऐं द्रम्गुः दीर्घात्परस्य वरुणस्य नवृद्धिः ऐं द्रावरुण
मैत्रावरुणौ दीर्घात्किं आग्निवारुणी अग्नेरिदवृद्धौ आग्निवारुणी सौहार्द्दं सौभागिनेयः सौभाग्य साकु
सैंधवं मानुशातिकं ऐहलौकिक पारलौकिकं णि तेवा उक्ताः वद्दमाणप्रत्ययाः र द्रेदेवता।
णि तेवा स्वस्त्रीयः असुरस्यापत्यमासुर्यः पित्र्योगव्य पयस्य कुल्य तदीय तदीय मदीय अन्य
स्य उक्तं अन्यदीय पितुर्भ्रातरि व्यः पितृव्यः पिता पितृव्यः मातुर्भ्रातरि डुलः मातुलः मातृपितृभ्यां पितृ
रि मातरि च डामहच मातुः पिता मातामहः मातुर्माता मातामही पितुः पिता पितामहः पितामही
२६ अवेर्दुग्धे सोढदूसमरीसाः अविसोढं अविदूसं अविमरीसं तिलान्निः फलाः पिंजपेजौ निःफ
लास्तिलास्तिलपिंजः तिलपेजः कारकात्क्रियायुक्ते कारकादपेते प्रत्यया क्रियायुक्ते कर्तरि कर्म
से मणि चकुक मेनरतःकौकामे वर्णः परिवृतो वा सौर पः कंबलः द्वैपः वैयाघ्रः पाण्डुकंबलादि नि
पाण्डुकंबलेन संवृतः पाण्डुकंबली रथः वाशिष्टेन वृष्टं वाशिष्टसाम कालेयं वरंस्विनाकृतो वा वारु र
चोग्रपः मनुना प्रोक्तो मानवो धर्मः मथुराया आगतो जातो वा माथुरः ग्रामादागतो ग्राम्यः
धुरं वहति रतिधुर्यः धौरेयः सर्वधुरीणः एकधुरीणः मुखपार्श्वतसो लोपईयेमुखतो भवः मु

ण्यः। माद्यः। माण्डूक्यः। पौतिमाष्यः। नाडायनः। चारायणः। गार्ग्यायणः। वात्सायनः। आमुष्यायणः। आ-
त्रेयः। कापेयः। नैधेयः। गाङ्गेयः। माहेयः। गौधेयः। नादेयः। कल्याण्यादीनामिनङ्। काल्याणिने-
यः। कौलटिनेयः। गोधादेरारगुदीचाम्। गौधारः। नाडारः। पाण्डारः। गौधेरः। नादेरः। पैतृष्वस्री-
यः। मातृष्वस्रीयः। पितृष्वसादेश्छण्। ढकि लोपः। मातृष्वसेयः। पैतृष्वसेयः। चाटकैरे पा-
ण्यः। चटकादैरण्। चटकस्यापत्यं चाटकैरः। अपत्ये लुक्। चटकायास्तु गवम्। ते केचित् प्रत्य-
यस्य। गार्ग्याः। वसिष्ठाः। भृगवः। अङ्गिरसः। कुत्साः। गौतमाः। अत्रयः। विदाः। अङ्गाः। वङ्गाः। क-
लिङ्गाः। विदेहाः। स्त्रियामवन्तिकुन्तिकुरुभ्यश्च सूरसेनादिभ्योऽवस्तु लोपः। अवन्ती। कुन्ती। कुरूः।
सूरसेनो देवतेदमर्थे देवतार्थे इदमर्थे चेत्कावहमारम्भ अस्य पाः। इन्द्रो देवतास्येरो
ड्रे से माना गेयमग्नये मेधीये वाक्यो ष्ठतीय आग्नेयो बामीयमारुद्रेति यज्ञपानपादपानपा
तैरपानमनुपानमादेशोऽईयेयपो। परतः अपानं द्वीयं अपानं स्त्रीयं अपानं द्वीय
अपानं स्त्रीयं प्रावृषेण्यः। प्रावृट् देवतास्य प्रावृषेण्यः। प्रजापतिः देवतास्य काय। कवि
ढ्ये। पूर्वोत्तरपदाद्यो। स्वरये। कवि हविः। हिरण्यपि। आग्नि मारुतं सामान्येतत् ने हस्वादवि

४५ पाञ्चपत्यः कानीनः कन्यायासे मेकातीया काञ्चाः गार्गीपारे वत्यास्मपत्यं रैवतिकः पुष्येण युक्ता
पौर्णमासस्ता पौषी ते शौनकिस्यापत्यं दाक्षिपास्त्रे देवतायस्य शुक्रियं रुद्रस्य लिंगं रुद्रियं सौदीनी
व्यात्याहिकः कुद्दाले खनति कौद्दालिकः हलं वहति हालिकः शब्दं करोति शाब्दिकः दांडुरिकः धा
र्मं चरति धार्मिकः पक्षिणां हन्तीति पाक्षिकः शाकुनिकः तैत्तिमिसिकः वैदिकः तैत्तिरिकः मासिकः।
मैनिकः मार्गिकः सारंगिकः पुराणमधीते पौराणिकः पीलवादिकः णी दिभ्यः कुणाः हो पाकमू
लयोः पीलकुणः पाकः पीलुकुणः कर्णस्य मूलं कर्णजहः पक्षात् तिः मूले पक्षस्य मूलं पक्षतिः चु
चुचणौ वित्तेः विद्यया वित्तः विद्याचणः विद्याचुंचुः वैशालशंकटे विस्तृतविशालः विशंकटः विसप्र
दंकटः विकटः संकटः प्रकटः उत्कटः आलावृ तिलो मामगाम्यो रजस्य कटः आलावूनां रजः आला।
वूकटः तिलकटः उमाकटः भंगाकटः गोष्ठादयः स्थानादिषु पशुनाम्नः गवां स्थानं गोष्ठः गोगोष्ठम
27 श्वगोष्ठं संघाते कटः अवीनां संघातः अविकटं विस्तारे पटः अविपटः द्वित्वे गोयुगः द्वौ वृषौ
उष्ट्रगोयुगं द्वौ उष्ट्रौ षट्त्वे षड्गवः अश्वषड्गवः स्नेहे तैलः तिलतैलं सर्षपतैलं भवने क्षेत्रे
शाकटशाकिनौ इक्षुशाकटं इक्षुशाकिनं भवने... अवात्कुटारकटौ अवाचीनं
अवकुटारः अवकटः नासिकायां नतेः संज्ञायां टीटञ्नाटभ्रटाः अवनते नासिकायाः अवटी

रवतीयं पार्श्वतीयं देवस्य राजजन परोणकुकार्ईये देवानां रदं देवकीयं स्वस्य इदं स्वकीयं राजकीयं जनकी
यं परकीयं मध्यान्मः भवादर्थे मध्यमः इदं मत स्य वा तलो पे राणि इदं मन इदं मतं चिर पस्न्परारिभ्य
त्नः चिरत्नं पस्त्नं परारित्नं ग्रामादि पञ्चाद्यतात् इम [illegible] ग्रामादि मे पञ्चम [illegible] ति मे इत्यनु [illegible]
वा स्याप मयट् सनादागते समरूप्यं समयं समीयं देवदत्तरूप्यं देवदत्तमयं देवदत्तीयं [illegible] गलिनो
[illegible] नः [illegible] गलिना [illegible] मधीयते [illegible] गलेचिनः पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोर्णि
निः पाराशर्येण प्रोक्तं भिक्षुसूत्रं मधीयते पाराशरिणः भिक्षवः शैलालिनो नटाः कर्मन्दकृशा
श्वादिनिः [illegible] कर्मन्दिनः कृशाश्विनः [illegible] विकारे [illegible]
शामीलं [illegible] विंशति त्रिंश
[illegible] विंशकः त्रिंशकः विंशतिकः त्रिंशतिकः [illegible]
[illegible] मनोर्जातावपत्येष्यञ्णौ मनोरपत्यं मनुष्यः मानुषः जातौ किं मानवः केन
चेकाः कार कातक [illegible] नरयरकरत्येते प्रत्ययाः भवन्ति कर्तरि कर्मणि [illegible]
[illegible] ते [illegible] मधीते [illegible] ग्रामादागतः [illegible] समीचीनः
समीचीनः तिरश्चीनः कुलस्यापत्यं कुलीनः [illegible]

तृतीया त्रयस्त्रिंशापमः प्रकृत्यादिभ्यश्च प्रकृत्याचारुः प्रायेणयाज्ञिकः गोत्रेणगार्ग्यः
समेनैति विषमेणैति द्विद्रोणेन धान्यं क्रीणाति सुखेन दुःखेन वा याति दिवः कर्मणि
कर्मसंज्ञा वा स्यात् अक्षैरक्षान्वा दीव्यति तुल्यार्थैर्योगे तुलोपमावर्ज्यं तृतीया कृष्णे
न तुल्यः रामेण सदृशः तुलोपमावर्ज्यं किं कृष्णस्य तुलोपमा वा नास्ति फलप्राप्तौ का
लाध्वनोरत्यन्तसंयोगे तृतीया मासेनानुवाकोऽधीतः फलप्राप्तौ किं मासम
धीते किंचिन्नायातः इत्यादि नमादियोगे चतुर्थी नमो नारायणाय स्वस्ति स्वाहा स्व
धालंवषड्योगे उपपदविभक्तेः कारकविभक्तिर्बलीयसी नमस्करोति देवान्
२० प्रभ्वादियोगे षष्ठ्यपि भोजनाय भोजनस्य वा प्रभुः समर्थः शक्तः कृष्णाय कृष्णस्य वा
भद्रं कुशलं सुखं आयुष्यमर्थः प्रयोजनं वा भूयात् रुच्यर्थधातुयोगे प्रीयमाणे च
तुर्थी हरये रोचते भक्तिः श्लाघह्नुङ्स्थाशपां प्रयोगे बोधयितुमिष्टे गोपी कृष्णाय
श्लाघते ह्नुते तिष्ठते शपते वा धारेरुत्तमर्णो भक्ताय धारयति हरिः स्पृहयतेरीप्सिते

पृथुपरि पर्वते त्र्यधिसुरवंशो योऽ यो गामं उभयत: कृष्णमरावं परित: समया
निकषा हा प्रति योगेपि सा कृष्णमक्रोशं चति वुभुक्षितेन प्रतिभाति किंचित मा
लो धनान्नैरं तत्र मासमधीते क्रोशं पर्वत: मासं गुडधाना: मासं कल्याणी क्रोश
कुटिला नदी नैरंतर्ये किं मासस्य द्विरधीते क्रोशस्यैकदेशे पर्वत: अभिपर्वी
तां शरीरस्यासामाचर: कर्म: अभिनि पूर्वस्य विश: उपान्वाध्याङ् पूर्वस्य वसः अ
धिशेतेऽधितिष्ठति अध्यास्ते वा वैकुंठं हरि: अभिनिविशते सन्मार्गम् उपवस
ति अनुवसति अधिवसति आवसति वा वैकुंठं हरि: नाभुक्त्यर्थस्य वने सिंहः उप
वसतीत्यादि सत्यादि योगे तृतीया सह शिष्येण आगतो गुरु: रावेसाकं सार्द्धं स
मं योगेपि येनांगविकार: येनांगेन विकृतेनांगिनो विकारो लक्ष्यते ततस्तृतीया
अक्ष्णा काण: अंगविकार: किं अक्षि काणमस्य किंचतु प्रकारं प्राप्तस्य लक्षणे

३६ दूरत्वादि क्रियागुणजातिसंज्ञाभिः समुदायात् पृथक्करणं निर्धारणं यतस्तत्र षष्ठीसप्तम्यौ
क्रियापराणां क्रियापरेषु वा भगवदाराधकः श्रेष्ठः गवां गोषु वा कृष्णा गौः सम्पन्नक्षीरा
नृणां नृषु वा ब्राह्मणः श्रेष्ठः छात्राणां छात्रेषु वा मैत्रः पटुः स्वाम्यादियोगे षष्ठीसप्त
म्यौ गवां गोषु वा स्वामी अधिपतिः ईश्वरः दायादः साक्षी प्रसूतः प्रतिभूर्वा अनादरा
धिक्ये क्रियालक्षणे षष्ठीसप्तम्यौ रुदति रुदतो वा प्राव्राजीत् आयुक्तकुशलाभ्यां यो
गे तात्पर्ये षष्ठीसप्तम्यौ आयुक्तः कुशलो वा हरिपूजने हरिपूजनस्य वा तात्पर्ये किं
एकदेशे गौरायुक्तः साधुनिपुणाभ्यां योगे पूजायां सप्तमी मातरि साधुर्निपुणो वा प्र
सितोत्सुकाभ्यां योगे तृतीयासप्तम्यौ प्रसित उत्सुको वा हरिणा हरौ वा साधुसाध्वप्रयो
२९ गे सप्तमी साधुः कृष्णो मातरि असाधुर्मातुले निमित्तात्कर्मयोगे सप्तमी चर्मणि द्वी
पिनं हन्ति दन्तयोर्हन्ति कुञ्जरं केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः क्तस्येन्विषयस्य कर्मणि
सप्तमी अधीती व्याकरणे तादर्थ्ये चतुर्थी संयमाय श्रुतं धत्ते नरो धर्माय संयमे ध
र्ममोक्षाय मेधावी धनं दानाय मुक्तये तुमोऽर्थाप्रयुक्तस्य कर्मणि चतुर्थी फलेभ्यो

ग्रा

पृष्ठेभ्यः स्पृहयति ईप्सितं किम् पुष्पं वनेस्पृहयति वायुः क्रुधद्रुहेर्ष्योऽसूयार्था
नां प्रयोगे यं प्रति कोपः स संप्रदानं स्याच्च तुर्थी हरये क्रुध्यति द्रुह्यति ईर्ष्यति असूय
ति इत्यादि यं प्रति कोपः यः किं मा यीई र्ष्यति तन्नाम न्यो माद्रुह्यात् कृतादियो
गे पंचमी कृते ज्ञानान्न मुक्तिः अन्यो ग्रहाद्विहारः आरात म्रात इतरो रामात् भिन्नः
कृष्णात् पूर्वं ग्रामात् प्राग्वनात् दक्षिणो ग्रामात् दक्षिणाहि ग्रामात् विनाकृ
ष्णात् पृथक् ज्ञानाद्वा उपाध्यायादधीते जनिकर्तुः प्रकृति ब्रह्मणः प्रजाः प्रजा
यंते यतश्चाध्वकालनिर्माणं तत्र पंचमी तद्युक्तादध्वनः प्रथमासप्तम्यौ कालात् सप्तमी च वक्त
व्या वनाद् ग्रामो योजने योजनं वा कार्तिक्याः आग्रहायणी मासे अपाङ्परिभ्यो
पंचमी च वक्तव्या आ पहरेः परि हरेः संसारः आ मुक्तेः संसारः प्रद्युम्नः कृष्णात् प्र
ति तिलेभ्यः प्रति यच्छति माषान् हेतौ तृतीया पंचम्यौ जाड्यात् जाड्येन वा बद्धः
स्तोकान्मुक्तः दूरान्तिकार्थप्रयोगे षष्ठ्यपि ग्रामस्य ग्रामाद्वा दूरात् अंतिका

प्र ग्रामस्य वा

जगाम ग्रीणतेदायी कृत्यानां कर्त्तरि वा मया मम वा सेव्यो हरिः उभयप्राप्तौ कृत्ये षष्ठी
न नेतव्या व्रजं गावः कृष्णेन दूरनिकटार्थयोगे षष्ठीपंचम्यौ दूरं निकटं वा ग्राम
स्य ग्रामाद्वा दूरनिकटार्थेभ्यो द्वितीयातृतीयाषष्ठीपंचमीसप्तम्यः दूरनिकटार्थेभ्यो
नाम्नः स्वमात्रे द्वितीयातृतीयापंचमीषष्ठीसप्तम्यः ग्रामाद्दूरं दूरेण दूरात् दूरस्य
दूरे वा एवं निकटे द्यूतार्थस्य क्रयविक्रयरूपव्यवहारार्थस्य च दिवः कर्मणि षष्ठी श
तस्य दीव्यति नोपसर्गेण तस्य शतं वा प्रदीव्यति षष्ठी हेतुप्रयोगे अन्नस्य हेतोर्वसति
सर्वादेर्हेतुप्रयोगे हेतौ षष्ठी च तृतीयाषष्ठ्यौ केन हेतुना वसति कस्य हेतोः वा नि
मित्तपर्यायप्रयोगे सर्वादेः सर्वा विभक्तयो सर्वादेः सप्तमी यद्वयः को हेतुः किं प्रयोज
30 नं केन हेतुना ज्ञानेन निमित्तेन हरिः सेव्यः ज्ञाननिमित्ताय नाम्नोर्थे प्रथ
मा आख्यातकृत्समासतद्धितनिपातैरुक्ते कारके संबंधे च प्रथमा स्यात् घटः क्रियते
कुलालेन हरिः करोति कृष्णः कंसं हतवान् कृष्णेन कंसो हतः पंचनीतिर्हि दानीयो विप्रः
उपाध्याया योग्या हि एः पंचनीसप्तालीं ग्रामाद्देदः ३ ठुर घः ३ पद्दतपशुः ३ कृतान्नः पी

यातिकप्पत्तोऽपकर्मण्याधारे च पंचमी हर्म्यात्प्रेक्षते आसनात्प्रेक्षते कर्तृकर्मणोर
नादौ कृति षष्ठी कर्तरि कर्मणि च षष्ठी तादिवर्जिते कृति प्रयुज्यमाने कृष्णस्य कृतिः जग
तः कर्ता कृष्णः गुणकर्मणि चाने ताऽश्वस्य ग्रामं ग्रामस्य वा उभयप्राप्तौ कृति कर्तरि
ग१ षष्ठी न किंतु कर्मण्येव आश्चर्यो गवां दोहोऽगोपेन स्त्रीप्रत्यययोरकाकारयोर्योगे नो
क्तं भेदिका विभित्सा वा रुद्रस्य जगतः शोभनकृतिर्वा विचित्रा जगतः कृतिर्हरेरन्य
शब्दानामनुशासनमाचार्येणाचार्यस्य वा नाधारार्थक्तस्य योगे षष्ठी राज्ञां मतः बु
द्धः पूजितो वा इदमेषामासितं शायितं कृतं वा कृतवान् कृतवति चकृवान् चक्राणः चक्रि वा सुखं
हरिः हरिं दिदृक्षुः अलंकरिष्णुर्वा दैत्यान् घातुको हरिः जगत्स्रष्टा सुखं कर्तुं विष्णुना हु
ता दैत्या दैत्यान् हतवान् हरिः ईषत्करः प्रपंचो हरिणा सोमं पवमानः आत्मानं मंड
यमानः वेदमध्यापयन् कर्ता लोकान् द्विषन् मुरस्य मुरं वा द्विषन् भविष्य
त्यकस्य भविष्यदाधमर्ण्यार्थस्येनश्च योगे षष्ठी सतः पालकोऽवतरति व्र

अनुरूपं रूपयोग्यम् अर्थमर्थं प्रति प्रत्यर्थं शक्तिमनतिक्रम्य करोतीति यथाशक्ति हरेः सादृश्यं सहरि समृ
द्धेः सादिरिति सहस्यस्य सः ज्येष्ठस्यानुपूर्व्येणानुज्येष्ठं चक्रेण युगपत् सचक्रं सदृशः सख्या स
सखि क्षत्राणां संपत्तिः सक्षत्रं तृणमप्यपरित्यज्य सतृणं अग्निग्रन्थपर्यन्तमधीते साग्नि य
था सादृश्ये यथाशब्दः सादृश्येन समस्यते यथा हरिस्तथा हरः अवधारणे यावदिति च अवधा
रणार्थे यावच्छब्दे प्रयुज्यमाने योऽन्वयः सोऽव्ययीभावसंज्ञः समासो भवति यावन्तः श्लोका
स्तावतोऽच्युतप्रणामाः यावच्छ्लोकं अवधारणे किं यावद्दत्तं तावद्भुक्तं क्वचिदनव्ययं पूर्व
पदोऽव्ययीभावसंज्ञः समासो भवति उन्मत्ता गङ्गा यस्मिन्देशे इत्युन्मत्तगङ्गं शाकस्य लेशः शा
कप्रति अक्षेण विपरीते वृत्ते अक्षपरि शलाकया विपरीते वृत्ते शलाकापरि एकेन विपरीते वृत्ते
एकपरि क्वचित् अपविष्णु अपविष्णु परिविष्णु परिविष्णु बहिर्वनात् बहिर्वनं प्राग्वनात्
3| प्राग्वनं आमुक्तेः आमुक्ति अभ्यग्नि अभ्यग्नि प्रत्यग्नि प्रत्यग्नि वनस्य समीपे उपवनं गङ्
गाया अनु अनुगङ्गं तिष्ठन्ति गावो यस्मिन्काले स तिष्ठद्गु आयतीगवं पारेगङ्गाया पारेगङ्ग
इत्यादयो निपात्याः खले यवा यस्मिन्काले खलेयवं द्वौ मुनी वंश्यौ द्विमुनि त्रिमुनि व्या
करणस्य सप्तगङ्गासमाहृताः सप्तगङ्गं द्वियमुनं इति द्विगुः समासे सति टच् अकारस्येते प्रत्यया

तांवरः वीरपुरुषः कौंकुमं वसं माथुरा घनवान् दृष्टवती विवृद्धोऽपि संवर्द्धि
सवे हेतुमसां प्रते कस्मादमुना रद इत्यवोधि सः इति विग्रहार्थः ॥ अथाव्ययं विभ
क्ति विशिष्टानां पदानां समासो निरूप्यते समासः स्यान्वयेनाम्ना नाम्ना मन्वये सति
समासो भवति चकारात् कृत्तद्धितधातुसंज्ञा प्रत्ययोत्प्रत्ययाश्च कृतो समासंज्ञकाव्यय
पूर्वनिपातः पूर्वमव्ययं अव्ययीभावः अव्यये पूर्वपदे सति योन्वयः सोऽव्ययीभावसं
ज्ञकः समासो भवति समासप्रत्यययोः समासे वर्तमानाया विभक्तेः प्रत्यये च परे लुक् नमता
स्यादिः सनपुंसकं अव्ययीभावो नपुंसकलिंगो भवति नपुंसकस्येतिकस्वः अव्ययीभावा
त विभक्तेर्लुक् अधिस्त्रि गुरुकार्यं अतेमनतः अदंतादव्ययीभावाद्विभक्तेर्नलुक् अतेव
त्वपिताऽमादेशः कुम्भस्य समीपमुपकुम्भं वा नम्यौः अदंतादव्ययीभावात् टाङ्योर् मा उपकु
म्भेन उपकुम्भेन वा कृतं उपकुम्भे उपकुम्भे वा निधेहि अनतः किं उपकुम्भात् भक्ताणां समृद्धिः सुभ
द्रं यवनानामव्ययं दुर्यवनं मक्षिकाणामभावो निर्मक्षिकं हिमस्यात्ययोऽतिहिमं निद्रा संप्र
ति न युज्यते इत्यतिनिद्रं हरिशब्दस्य प्रकाश इति हरि विष्णोः पश्चादनुविष्णु रूपस्य योग्यं
अव्ययंविभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाऽभावात्ययाऽसंप्रतिशब्दप्रादुर्भावपश्चाद् यथाऽनुपूर्वयोग
पद्यसादृश्यसंपत्तिसाकल्यांतवचनेषु

वाक्संस्त्रमयं गोः पुरीषं गोमयं न संधिर्य्वौ युवु संधिजयोर्यकार वकारयोः संबंधिनः स्वरस्य न वृ
द्धिः किंतु तयोर्युडागमः यस्येदं वैयस्येदं पश्चाद्वृद्धिः व्याकरणमधीते वेद वा वैयाकरणः स्वश्वं
वेद सौवश्वः व्यासस्यापत्यं वैयासकिः द्वारादीनां च द्वारे नियुक्तो दौवारिकः व्यल्कसस्येदं वैयल्कसं स्वसौ
वग्रामिकः नैयग्रोधं सौवादुमृदवं शौवस्तिकं इते जातार्थे लज्जा जाता यस्य लज्जितः फलितः
तारकितस्तीतरतमेयसिष्ठाः प्रकर्षे अतिशयेन शुक्लः शुक्लतरः शुक्लतमः ईयसिष्ठे टिते
लघीयान् लघिष्ठः गुर्वादेरिमनीयस्सु गरादिष्टेः लोपश्च गुरोर्भावो गरिमा अतिशयेन गु
रुः गरिष्ठः गरीयान् प्रियस्य भावः प्रेमा अतिशयेन प्रियः प्रेष्ठः प्रेयान् अतिशयेन स्थूलः
स्थविष्ठः स्थवीयान् प्रशस्य श्रेष्ठः श्रेयान् दीर्घस्य द्राघ द्राघीयान् द्राघिष्ठः स्थिरः स्थे
32 ष्ठः स्थेयान् स्फिरः स्फेष्ठः स्फेयान् उरुः वरिष्ठः वरीष्ठः वरीयान् बहुल बंहिष्ठः बंहीयान् वृद्धः व
र्षिष्ठः वर्षीयान् तृप्रः त्रपिष्ठः त्रपीयान् वृंदारकः वृंदिष्ठः वृंदीयान् दविष्ठः दवीयान् अतिशये
न अल्पः कनिष्ठः कनीयान् ह्रस्व ह्रसिष्ठः ह्रसीयान् क्षिप्रः क्षेपिष्ठः क्षेपीयान् क्षुद्रः क्षोदीयान्
अंतिकः सामिक नेदिष्ठः नेदीयान् बाढः साधिष्ठः साधीयान् ई लोपः ज्यायान् ज्यादीयसः ज्या

वलोदीर्घः॥ कृषीवलः आसुतीवलः परिषद्वलः अन्येभ्योपि॥ भ्रातृवलः पुत्रवलः दंतावलः शिखा
वलः तुंदिवलिवटेर्भः तुंदिभः वलिभः वटिभः एतत्किमिदं यत्तदस्यः परिमाणे वतुः यत्तदेतदामाव
तौ यावान् तावान् एतावान् किमिदान किमः किर्वेतोर्वेतोवस्यायः कियान् इदमः इश् एवतो वंस्य घः
इयान् अनुग्रहादेर्लुः अनुग्रालुः कृपालुः दयालुः तुन्दादेः दंतादुरः दंतुरः अस्मायामेधास्रजोविनि तप
स्वी तेजस्वी मायावी मेधावी स्रग्वी आमयस्य दीर्घश्च आमयावी वाचोग्मिन् वाग्मी आलाटौ कुत्सित
भाषिणि॥ वाचालः वाचाटः ईषदसमाप्तौ कल्पदेश्यदेशीयाः ईषदसमाप्तः॥ सर्वज्ञः सर्वज्ञकल्पः
पटुजातीयः कृतुपः कासूगोणीभ्यां ष्टरः ह्रस्वा कासूः कासूतरी गोणीतरी वत्सोक्षाश्वर्षभेभ्यस्तनुत्वे॥
तनुर्वत्सः वत्सतरः उक्षतरः अश्वतरी ऋषभतरः देवतातात् तादर्थ्ये यः अग्निर्देवतायै इदं अग्निदेवत्यं
पादार्घाभ्यां च पादार्थमुदकं पाद्यं अर्घ्यं नवस्य नू आदेशः त्नतनप्खनाः प्रत्ययाः नूत्नं नूतनं नवीनं
पुराणे प्रात्तनश्च प्रत्नं प्रणं प्रतनं प्रत्नं प्रीणं अतिथेर्यः अतिथये इदं आ[illegible]तिथ्यं प्रशंसायां रूप
पः प्रशस्तो वैयाकरणः वैयाकरणरूपः कुत्सायां पाशः कुत्सितो भिषक् भिषक्पाशः वेयः सतपूर्वेचर
ट पूर्वं दृष्टः दृष्टचरः आढ्यचरी प्रकृत्यर्थविकारप्राधान्यादिषु मयट् अन्नं प्रचुरं यस्मिन् अन्नम
यो यज्ञः मृन्मयो घटः स्त्रीमयो जल्मः अमृतस्वरूप असमासे अमृतमयः [illegible] आत्मस्य विकारो वयवे

पि उक्ताः वद्गमाणा अप्रत्ययाः स्वार्थे पि स्युः देवदत्तकः चौरः वय एव वयसः रक्ष एव राक्षसः चत्वार एव
र्णाः चातुर्वर्ण्यं समीपमेव सामीप्यं चत्वारो वेदाः चातुर्वैद्यं प्रस्तर एव प्रास्तरः चातुर्मास्यं त्रैलोक्य
मनंतर एवानंत्यं क्रम एव साप्तपद्यं आवसथ एवावसथ्यं इतिह एवैतिह्यं नाम पारंपर्योपदेश मेव भेष
जमेव भैषज्यं भागरूपनामभ्यो धेयः भाग एव भागधेयं नामधेयं रूपधेयं देवात्तल् देवा
एव देवता मृदस्तिकः मृदेव मृत्तिका सस्नौ प्रशंसायां प्रशस्ता मृत् मृत्सा मृत्स्ना सूत्रम् तीन योर्युष्म
दस्मदोर्युष्माकास्माकौ एकार्थे योस्तवकममकौ युवयोर्युष्माकं वायं यौष्माकः यौष्माकी
नः आवयोरस्माकं वायं आस्माकः आस्माकीनः तवायं तावकः ममायं मामकः तावकीनः मा
मकीनः वत्तुल्ये सादृश्ये वत्प्रत्ययो भवति चंद्रेण तुल्यं चंद्रवत् ब्राह्मणवत् क्षत्रियवत् मथु
33 रायामिव मथुरावत् पाटलिपुत्रे प्रकारः चैत्रस्येव चैत्रवत् मैत्रस्य गुरुरिदमर्हं पि विधिमर्हतीति
विधिवत् भावे त्वतलौ शब्दस्य प्रवृत्तिनिमित्तं भावस्त्व वाच्यास्तेस्युः तातस्त्रियां त्वयुक्तं त
ल्लिंगं ब्राह्मणत्वं ब्राह्मणता ब्राह्मण्यं शुक्लता शौक्ल्यं वैदुष्यं कर्मण्यपि ब्राह्मणस्य कर्म ब्रा
ह्मण्यं राज्यं सैन्यं लोहितादेर्डिमन् वा भावे लोहितिमा लोहितता लोहित्यं लाघिमा लघिमा

टं अवनाटं अवभ्रटं तद्योगान्नासिकाऽवटीटा पुरुषोऽवटीटः। नेर्बिडज्बिरीसचौ नतेऽर्थे निबिडं निबि
रीसं इनच्पिटच्चिकचि च प्रत्ययाने: चिक चि चिकादेशौ नतेऽर्थे चिकिनं चिपिटं चिक्कं क्लिन्नस्य चिलपिल
उलोलः प्रत्ययोऽस्य चक्षुषी त्यर्थे क्लिन्ने चक्षुषी अस्य सः चिल्लः पिल्लः चुल्लः उपाधिभ्यामासन्ना
रूढयोस्त्यकः पर्वतस्यासन्नाभूमिरुपत्यका आरूढाधित्यका कर्मणि: ठ घटते इत्यर्थे कर्मणि घ
टते कर्मठः साक्षाद्द्रष्टरि संज्ञायामिनिः साक्षाद्द्रष्टा साक्षी ईष्टादिभ्यश्च इनिरनेन इत्यर्थे ईष्टमनेन
ईष्टी अधीती हैयंगवीन श्रोत्रियन्दै पि अनुपदी इत्यादयो निपात्याः ह्योगोदोहस्य घृ
तं हैयंगवीनं छन्दोऽधीते श्रोत्रियः परक्षेत्रे चिकित्स्यः क्षेत्रियः अनुपदमन्वेष्टा अनुपदी आख्या
तोऽव्ययसर्वादेष्टेः प्रागकः पचतकि उच्चकैः सर्वकः अयकं असकौ त्वकं अहकं त्यतनौ भवाद्यर्थे
त्यतने प्रत्ययौ स्तः अमात्यः कुत्र भवः कुत्रत्यः कुतस्त्यः इहत्यः सनातनः क्वत्यः तत्रत्यः अव्ययस्यत
द्धितयस्तरयोष्टिलोपः वक्ति भववाह्यः प्रोभवः श्वोवः चोनपुनिकः दक्षिणापश्चात्पुरसस्त्यक् दाक्षि
णात्यः पाश्चात्यः पौरस्त्यः रोमनसो रेषमस्तनं ह्यस्त्यं श्वस्त्यं शौवस्तिकः कालाट्ठञ् सौवस्तिके अद्यातनः ह्यस्
स्तनः सनातनः सदातनः पुरातनः दोषातनः सायंतनः चिरंतनः। प्राह्णेतनः प्रागेतनः स्वार्थे

म्वृशीतितमः द्विचत्वारिंशत्तमः पंचाशत्तमः षष्टेः पूरणः षष्टितमः सप्ततितमः नवतितमः शतादे
र्नित्यं शततमः संख्यायाः प्रकारे धा द्वाभ्यां प्रकाराभ्यां द्विधा त्रिधा चतुर्धा दशधा द्वित्रिभ्यां मे धा
धमुञ्वा द्वैधा त्रैधा द्वैधं त्रैधं धा एकात ध्यमुञ्वा ऐकध्यं एकधा एकायाः क्रिन्नसेहायेराकाकी
क्रियायाअभ्यावृत्तौ कृत्वस् पंचवारानरति पंचकृत्वः सप्तकृत्वः द्वित्रिचतुर्भ्यः सुः द्विः त्रिः चतुः एकस्य सकृदादे
शश्च एकवारान् सकृत् बह्वः ल्यार्थे तकारकात् शस् बहुशः अल्पशः संख्यापरिमाणयोर्वीप्सा
यां द्वौ द्वौ इति द्विशो ददाति प्रस्थशः माषशः तयदुपद्वौ संख्याया अवयवे द्वाववयवौ यस्य तत् द्वित
यं त्रितयं चतुष्टयं चतुष्टयी द्वयं त्रयं द्वयी त्रयी स्त्रीपुंसाभ्यां नञ्स्नञौ स्त्रैणः पौंस्नः पुंसि भव
34 वः पौंस्नः वा वीप्सायां पदे द्विः वृक्षं वृक्षं सिंचति ग्रामे ग्रामे रमणीयः परेर्वर्जने वा द्विः परि
परि वंगेभ्यो वृष्टो देवः वंगान् परिहृत्येत्यर्थः परि वंगेभ्यो वृष्टो देवः उपर्यध्यधसः सामीप्ये
द्विः उपर्युपरि ग्रामं ग्रामस्योपरिष्टात् समीपदेशे इत्यर्थः अध्यधि सुखं सुखस्योपरिष्टात् समी
पकाले दुःखमित्यर्थः अधोऽधो लोकं लोकस्याधस्तात् समीपदेशे इत्यर्थः वाक्यादेः संबो
धनस्यासूयासंमतिकोपकुत्सनभर्त्सनेषु उदाहरणं सुंदर सुंदर वृथा ते सौंद
र्यं समते देव देव वंद्योऽसि सिक्को दुर्विनीत दुर्विनीत रदानी ज्ञास्यसि कुत्सने धानुष्क धानुष्क वृथा

शाष्टात्स्वरस्य ई यस ईकारस्य लोपः अतिशयेन वृद्धः प्रशस्यो वा ज्यायान् ज्येष्ठः बहोरिष्ठेयिः बहोस्
तेरस्यैकारस्येष्ठस्यैकारस्य चिरादेशः बहोर्भूरादेशः भूयिष्ठः भूयान् किमोऽरव्ययादाख्याताच्चतरत
मयोराम् द्रव्यप्रकर्षे कृतस्वरो किंतमां उच्चैस्तरां गायति पचतितरां पठतितमां द्रव्यप्रकर्षे तु उच्चैस्त
मस्तरुः परिमाणे दघ्नद्वयसट्मात्रट् जानुदघ्नं शिरोद्वयसं पुरुषमात्रं पुरुषदघ्नं स्त्रियां मए च चो
रुषं हस्तिन वर्तेतास्मार्थे द्वयसमात्रो तावत् द्वयसं तावन्मात्रं द्वयोर्बहूनां चैकस्य निर्द्धारणे किमादिभ्यो
डतरडतमौ भवतः महतो कारणेः कतरः भवतां ताञ्चिकः कतमः भवतां यतरः स्मा किकस्ततरडडु डतु
संख्येयः विशेषावधारणे द्वेः स्त्रीयः द्वयोः पूरणे द्वितीयः त्रेः सम्प्रसारणं च तृतीयः षट्कतिकतिपयचतुर्भ्यस्थ
ट् षष्ठः षष्ठी कतिथः कतिपयथः चतुर्थः चतुरो यलोपश्च लोपः तुर्यः तुरीयः पंचादेर्मट् पंचमः पंच
मीसप्तमः अष्टमः नवमः दशमः एकादशादेर्डट् दशान्तस्य परे एकादशः स्यात् एकेन अधिकाद
श एकादशः एकादशानां संख्यापूरकः एकादशः एकादशी ड्डः षष्ठ्नो रातेस्संख्यायामुत्तरपदे अनशीते
अष्टादशः द्वादशः द्वादशी त्रेस्त्रयस् त्रयोदशः चतुर्दशः पंचदशः षोडशः सप्तदशः विंशत्यादेर्वा त
मट् एकेन ऊना विंशतिः एकोनविंशतिः एकोनविंशतेः संख्यापूरकः एकोनविंशतितमः विंशतेस्ति
लोपे डिति विंशः त्रिंशत्तमः त्रिंशः द्वाभ्यामधिकाशीतिः द्व्यशीतिः द्व्यशीतेः संख्यापूरकः द्व्यशीतितमः

४०२

तडिदादिभ्यश्चेति तडित्वान् विद्युत्वान् ऊर्मीसदेरिकैनौमायोव्रीहिमायिकः लोमपामपिछादिभ्यः शनेलचः लोमशः गि
रिशः पामनः द्रुद्रुणः अंगना लक्ष्मणा अच्चलक्ष्मणः विष्वगित्युत्तरपदलोपश्चाकृतसंधेः विषुणः पिच्छिलः
तुंदिलः फेनिलः सिध्मादेर्लः सिध्मलः चूडालः कुमुदनडवेतसेभ्यो ड्मतुप् कुमुद्वानि संति गोसैति कुमुद्वान् नड्वा
न् वेतस्वान् महिषात् ड्मतुः महिष्मान् नदेशः नडशादाड्ड्वलः शाड्वलः नड्वलः शिखाया वलः शिखावलः नडादि
नामीये कुक् नडकीय कुंचायाः ह्रस्वत्वं च कुंचकीयं शृंगवृंदाभ्यामारकः शृंगारकः वृंदारकः फलबर्हाभ्यामि
नः फलिनः बर्हिणः हृदयादालुः हृदयालुः शीतोष्णतृप्रेभ्यस्तदसहने शीतं न सहते [redacted] ना
शीतालुः उष्णालुः तृप्रं दुःखं न सहते तृप्रालुः हिमाच्चेलुः हिमं न सहते हिमेलुः बलाद्दूलः बलूलः वा
तात्समूहे च वातं न सहते ~~शीतालुः उष्णालुः~~ वातस्य समूहो वा वातूलः तः पर्वमरुद्भ्यां पर्वतः मरुत्तः ऊ
र्णाहंशुभंमोर्युस् ऊर्णायुः अहंयुः शुभंयुः स्वस्वामिन्यैश्वर्ये स्वमैश्वर्यं अस्यास्तीति स्वामी वातातीसारपि
35 शाचानामिनि कुक् च वातकी अतीसारकी पिशाचकी इन्सह्वादिभ्योऽपि ज्योत्स्ना तमिस्रा तापसा से
कतः शार्करः ऊषसुषिमुष्कमधुखमुखकेनगपांशुपांडुभ्यो रः ऊषरः सुषिरः कुंजरः खरः मुखरः
नगरः पांडुरः मधुरः मुष्करः कच्छ्वा ह्रस्वत्वं च कच्छुरः द्युद्रुभ्यां मः द्युमः द्रुमः केशाद्वोऽन्यतरस्यां केशवः म
णिवः हिरण्यवः अर्णसो लोपश्च अर्णवः रजस्कृष्यासुतिपरिषदो वलच् रजस्वला कृष्यादेना

मीवेश्मगोमिला घवं गौरवं यौवनं शैशवं मौनं हैत्वं औज्ञत्वं महत्तो भावो महिमा अर इमनि हृस्वादेः
र्लघोः अकारस्य रं पं भवति रमनि इष्ठेयसो अपृथो भाव: प्रथिमा म्रदिमा क्रशिमा द्रढिमा लघोः किं
हो स्त्रिमा स्वसारेः किं न रजिमा वसत्लोप म: चव हेः वहो: परे षानि मनं दीनामिवर्णस्य लोपो वहो
भूरादेश भूवहे भाव: भूमा स्ते ना द्योन लोपश्चेय: सनस्यभावो कर्म वा सेयस्य सम: हृद्यं वि मयस्य गोसम:
ते मायप्रं कौचं हैत्रैकाकं कैदारिकं गारिक्यं हालिकं गार्मिण्यं गामता जनता वंधुता पाश्या वात्यास्व
त्यागव्या वार्द्धकं कैदार्यका वचिकं ब्राह्मण्यं वाडव्यं मारण्यं गजता सहायता पर्श्वाईण पर्श्व्यं नास
म: पार्श्वं सानुकं धेनुकं रथ्या खलगोरथेभ्य: इनत्र कट्या: खलिनी गोत्रार थकट्या इति तेवेत प्र
त्यया: स्त्रीय इति: स्त्रीय: आत्मनीन: विश्वजनीन: मातृभोगीन: अपपाय इतो प्रपीय: अप
य: आमित्री यं शकव्यंगव्यंहविष्यं खल्या यव्य प्रभुनीवस्यउ: वाचदीर्घ: प्रुने इति तप्रन्यप्र
न्यञ्ज धसेन ऊधन्य: आपविप्याष्ठ्य: आत्माप्या अविष्या अस्यर्थे मतु: नाम्न: गावोस्यास्मिन
वास्तिगोमान् श्रीमान् विद्वान् स्यास्तीति विद्वान् गोमती अर कैचमतर्थे नाम्नो इकोमत
र्थे अरसंसः वैजयंत: दण्डिक: धनिक: मां तोपधाद्वतिनो मांतात्मोपधाद वर्गांतादवर्णं पधाच्च
वतिनो स: किं वानलं दमावान् धनवान विद्यावान् यशस्वान दण्डो पवादे नेयवमान् भूमिमान्

तिषुदिवादयः कर्तरि चतुर्थः अथोऽपवादः दीव्यति दिदेव दीव्यात् अदेवीत् षिवुतं
तुसंताने सीव्यति ष्ठिवा टेरङ्क्षवधाने वाधः न्यषेवीत् ष्ठि वुगतिशोषणयोः स्त्री
व्यति ष्ठिवु निरसने ष्ठीव्यति स्नुसु अदनादानदर्शनेषु स्नुस्यति स्नसु निरसने।
स्नस्यति स्नस क्नसु कौटिल्यदीप्त्योः चक्नसिष अक्नसीत् व्युष प्लुष दाहे व्यु
ष पुष्णायिष न्तीगा व्रविक्षेप ननतन दह्यदहत ह्रो ग्रासः सा देरेवा नत्स्यति
नर्तिष्यति अनर्तीत त्रसी उद्वेगे त्रस्यति त्रसति त्रेसतुः तत्रसतु कुथपूतीभावे
२६ चु कोथिष युपद्धितायां अयोपीत् गुधपरिवेष्टने अगो धीत् क्षिपप्रेरो
५ क्षेप्ता अक्षैसीत पुष्पविकसने पुष्यति पुपुष्प तिम तीम ष्टिम ष्टीम गआर्द्री
भावे तिम्यति तिष्टेमिष अस्तेमीत् व्रूष २२ व्रूष वयोहानौ जीर्य

अमास्त माङ् माने मिमीते ममे अमास्त इत्यादि डुभृञ् धारणपोषणयोः बिभर्त्ति बिभृतः बिभ्रति
अबिभः बिभरांचकार बभार बभर्थ बभृव बभृम भ्रियात् अभार्षीत् अभृत डुदाञ् दाने
ददाति दादेः द्वित्वे सत्यदादेरातो लोपो ङिति दत्तः ददति ददते दत्ते अपि दधात्वे
त्वे पूर्वस्य च लोपो हौ परे देहि अददात् ददे पददाप देयात् अदात् अदित अदिषातां
घोणे डुधाञ् धारणपोषणयोः दधाति पूर्वस्य ङिति मसेधः समानस्य धात्मः पूर्वे दकारस्य धो दि
असे परे धत्तः दधति धत्ते धेहि धत्तां धेयात् अधात् अधित ॥ णिजिर् शौचपोषणयोः णे
जोगुणः निजविजविषां पूर्वस्य गुणो लुकि नेनेक्ति नेनिक्तः नेनिजति नेनिक्ते नेनिक्ते नेनिक्ते
ग्धि देः स्वरे पुनरुपधाया गुणः द्विरुक्तस्य धातोरविषये स्वरे उपधाया गुणो न नेनिजानि
चौरु नेनिजे अनेनेक् निनेज निनिजे निज्यात् निक्षीष्ट अनिजत् अनैक्षीत् अनिक्त विजिर्
पृथग्भावे वेवेक्ति विविक्तः वेवेक्ते विविचे विविच्ये विक्षीष्ट अविचत् इत्याद्य इति हु
द्यः ॥ ❁ ॥ दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमद [illegible] स्वप्नकान्तिग

दाधा घु
इत्य [illegible]
विक [illegible]
नो [illegible]
ति